# NCERT Solutions for Class 10 Sanskrit (Bhav): Chapter 2-पत्रलेखनम्

indCareer indCareer indCareer

# NCERT Solutions for Class 10 Sanskrit (Bhav): Chapter 2-पत्रलेखनम्

Class 10: Sanskrit (Bhav) Chapter 2 solutions. Complete Class 10 Sanskrit (Bhav) Chapter 2 Notes.

## NCERT Solutions for Class 10 Sanskrit (Bhav): Chapter 2-पत्रलेखनम्

NCERT 10th Sanskrit (Bhav) Chapter 2, class 10 Sanskrit (Bhav) Chapter 2 solutions

**(क)** अनौपचारिकम् पत्रम्

प्रश्न **1.**

चोरितायाः घटिकायाः प्राथमिक-सूचनार्थम् आरक्ष्यधिकारिणं प्रति पत्रं लिखत। **(**पृष्ठ **12)**

उत्तर:

आरक्ष्यधिकारि-महोदय!

वसुन्धरा-एन्क्लेव-क्षेत्रम्

नवदेहली

विषय-चोरितायाः घटिकायाः प्राथमिक-सूचना।

श्रीमन्,

अनेन पत्रेण अहं भवते एतत् सूचयामि यत् ह्यः प्रातरेव द्वादशवादने अहं स्वविद्यालयात् गृहम् प्रति आगच्छम्। मार्गे मम घटिका चोरिता अभवत्। सा घटिका मम पित्रा मम जन्मदिवसे उपहाररूपेण दता। अतः सा मह्यम् अति रोचते। अहम् तु तस्याः घटिकायाः अनुसारेण मम दैनिककार्याणि अकुर्वम्। घटिकायाः अभावे अहम् अति दुःखितः अस्मि।

अहम् प्रार्थये यत् यथाशीघ्रं मम घटिकाम् अन्वेष्य मां कृतार्थं करोतु भवान्।

सधन्यवादः

निवेदकः

समर्थः

निवासस्थानम् दिल्ली

दूरभाष-संख्या ………..।

(ख) औपचारिकम् पत्रम्

प्रश्न **2.**

अध्ययन प्रति मातरं समाश्वासयितुं पुत्र्या लिखितं पत्रं मञ्जूषायां प्रदत्तपदैः पूरयित्वा पुनः लिखत (पृष्ठ **13**)

मञ्जूषा – कुशलम्, प्रतियोगिताः, कुशलिनी, परिणामः, चिन्तिता, मतिम्, आनन्देन, करणीया, खेलप्रतियोगितासु, कालः

उत्तर:

परीक्षाभवनतः

दिनाङ्कः …………

पूज्यमातृचरणाः,

प्रणतीनां शतम्।

अत्र अहं कुशलिनी। आशासे भवती पितृमहोदयः च आनन्देन स्तः। मातः! अहं जानामि यद् भवती मम अर्धवार्षिक-परीक्षापरिणामकारणात् चिन्तिता अस्ति। अत्र चिन्ता न करणीया । प्रथमसत्रे तु अहं खेलप्रतियोगितासु रता आसम्। पठनाय तु कालः एव न आसीत् परम् अधुना तु सर्वाः प्रतियोगिताः समाप्ताः। अद्यारभ्य अहं केवलं पठने एव मतिम् विधास्यामि। आशासे वार्षिकपरीक्षायां मम परिणामः भवताम् आशानुकूलः भविष्यति। शेषं सर्वं कुशलम् भवत्याः चरणयोः

प्रणामाः

भवत्याः पुत्री

सुकन्या

प्रश्न **3.**

जलसंरक्षणस्य महत्त्वं वर्णयतः मित्रस्य मित्रं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तपदैः पूरयित्वा पुनः लिखत (पृष्ठ **14**)

मञ्जूषा- देशस्य, प्रयतमानाः, अपव्ययम्, विचारयति, जागरूकता, प्रयासः, जानीमः, जीवनम्, सह, अस्तु

उत्तर:

छात्रावासतः

दिनाङ्कः .......

प्रिय मित्र!

सप्रेम नमोनमः,

अत्र कुशलं तत्र अस्तु। भवतः पत्रं पठित्वा अतीव प्रसन्नताम् अनुभवामि यत् भवान् मित्रैः सह जलसंरक्षणप्रचारकार्ये रतोऽस्ति। एषः तु उत्तमः प्रयासः अस्ति। वयं सर्वे एव जानीमः यत् जीवने जलस्य महत्त्वं तु अतुलनीयम्। जलम् एव जीवनम् इति वयं सर्वे जानीमः परं पुनरपि वयम् अस्य अपव्ययम् कुर्मः। अनेन आगामिकाले कियान् भीषणजलसङ्कटः भवेत् इति कोऽपि न विचारयति। जलसंरक्षणार्थं जागरूकता अनिवार्या एव। यदि जनाः अत्र ध्यान न दास्यन्ति तदा अस्माकं देशस्य स्थितिरपि अफ्रीकादेशवत् भविष्यति। यथा ते जलबिन्दुप्राप्त्यर्थं प्रयतमानाः सन्ति तथा एव अस्माकं देशस्य अपि स्थितिः भविष्यति। अतः जलसंरक्षणार्थं जागरूकता अनिवार्या। शेषं सर्वं कुशलम्। पितृभ्यां चरणयो; चरणवन्दना।

भवतः मित्रम्

उमेशः

प्रश्न **4.**

सन्तुलितभोजनमेव सेवनीयम् इति वर्णयतः अग्रजस्य अनुजां प्रति पत्रम् लिखत **(**पृष्ठ **15)**

उत्तर:

परीक्षाभवनतः

दिनाङ्कः- 16-7-2020

प्रिये भगिनि कोपल!

नमोनमः!

अत्र कुशलम् तत्रास्तु। अद्यैव त्वया लिखितम् पत्रं प्राप्तम्। तेन मया ज्ञातम् यत् भवती असन्तुलितभोजनं भक्षयति, प्रतिदिनं 'जंक भोजनम्' इति खादति। ईदृशं भोजनं स्वास्थ्याय अनुचितम् अस्ति।त्वया उत्तमस्वास्थ्याय संतुलित भोजनं ग्रहीतव्यम् यतः 'स्वस्थशरीरे एव स्वस्थमनसः वासः' भवति अतएव भवती जंकभोजनस्य सेवनं मा करोतु। स्वास्थ्यवर्धकभोजनमेव भक्षयतु। संतुलिताहारस्य आशयः अस्ति यस्मिन् भोजने 'प्रोटीन-विटामिन-वसा-कार्बोहाइड्रेट्स' इत्यादीनि पौष्टिकानि तत्त्वानि संतुलितमात्रायाम् सम्मिलितानि भवन्ति। एतदर्थ भवती अधुनातः पौष्टिक आहारम् एव खादिष्यति। अनेन कदापि रुग्णान भविष्यति। भवती स्वास्थ्यविषये जागरूका तिष्ठतु इति मे अनुरोधः। पितृभ्यां चरणयोः चरणवन्दना।

भवत्याः अग्रजः

प्रवीणः

प्रश्न **5.**

जीवने सफलतां लब्धं परिश्रमस्य महत्त्वं वर्णयन्त्याः मातुः पुत्री प्रति पत्रम् पूरयत (पृष्ठ **16)**

उत्तर**:**

कानपुरतः

दिनाङ्कः- 20-3-2021

प्रिय पुत्रि!

सस्नेहम् आशीर्वादाः।

भवत्याः पत्रेण ज्ञातम् यत् प्रथमसत्रीयपरीक्षायाम् भवत्याः श्रेष्ठाः अङ्काः न प्राप्ताः। अतः अद्य अहम् त्वाम् जीवने सफलताम् लब्धुम् परिश्रमस्य महत्त्वम् बोधयामि। अस्मिन् संसारे समस्तजनाः सुखमिच्छन्ति परम् उद्यौगिनः एव सुखं प्राप्नुवन्ति। अपि च, आलस्यमेव जनस्य महान् रिपुः अस्ति येन जनः अनिष्टमेव प्राप्नोति। उद्यमेनैव कार्याणि सिध्यन्ति। परिश्रमं विना तु दैवं न सिध्यति। ईश्वरः अपि उद्योगिनः साहाय्यं

करोति स्वजीवनलक्ष्यम् लब्धुम् सर्वे: मनोयोगेन परिश्रमः करणीयः। अधुनातः स्वजीवने सफलताम् प्राप्तुम् परिश्रमेण ध्यानेन च अध्ययनं करिष्यसि। एषः उद्यमः एव भवत्याः ज्ञानवर्धनाय भविष्यनिर्माणाय च आवश्यकः अस्ति। आशासे, नूनमेव त्वम् जीवने सर्वदा साफल्यं लप्स्यसे। शेषं कुशलम्। भवत्याः माता

रोहिणी

प्रश्न **6.**

स्वदेशस्य संस्कृति वर्णयन्त्याः सख्या**:** विदेशिनी सखी प्रति पत्रं लिखत **(**पृष्ठ **17)**

उत्तर**:**

दिल्लीतः

दिनाङ्क: 17-6-2020

पत्रलेखनम्

प्रिया सखि जीशा!

सस्नेहम् अभिवादनम्!

अत्र सर्वे कुशलिनः। भवती एतद् ज्ञात्वा प्रसन्ना भविष्यति यत् अस्मिन् पत्रे अहम् स्वदेशस्य संस्कृतेः विषये बोधयामि। भारतीयसंस्कृतेः प्रमुखा विशेषता 'समन्वय भावना' अस्ति। अस्माकं संस्कृतिः विश्वबन्धुत्वभावनायां विश्वसिति उपदिशति च। अस्याः द्वितीया विशेषता अस्ति कर्मणि विश्वासः। तृतीया विशेषता ललितकलानाम् सुविकासः अस्ति।

एषा संस्कृतिः जनानाम् हृदयेभ्यः दुर्गुणान् दुर्व्यसनानि, पापानि च निस्सार्य दूरीकरोति। सदाचारशिक्षणेन मानवमनांसि निर्मलानि सात्विकानि च करोति। सत्यमिदं यत् संसारे यः कोऽपि स्वसंस्कृतिं त्यजति सः कदापि सुखी समृद्धः न भवति। किमधिकं संस्कृतेः अभावे भारतीयेषु मानवीयगुणाणाम् विकासः कदापि सम्भवः नास्ति। आशास्ति भवती अस्माकं भारतीयसंस्कृतेः विषये ज्ञात्वा आनन्दं अनुभविष्यति। स्वपित्रोः सेवायाम् मम प्रणामान् निवेदयतु।

भवत्याः सखी

राधिका

**प्रश्न 7.**

'पुत्रीं रक्ष पुत्री पाठय' इति अभियानं कथं सार्थकं भविष्यतीति स्वविचारं प्रकटयन् मित्रं प्रति पत्रं लिखत (पृष्ठ 17)

**उत्तर:**

दिल्लीतः

दिनाङ्कः 10-10-2020

प्रिय मित्र अभिषेक

सस्नेह नमः।

अत्र कुशलम् तत्रास्तु। ह्यः एव मम विद्यालये 'पुत्रीं रक्ष पुत्री पाठ्य' इति विषये एका गोष्ठी अभवत्। भारतवर्षे बालिकायाः संरक्षणाय सशक्तकरणाय च इदम् अभियान प्रारम्भत्।

लिंगचुनावस्य प्रक्रियायाः उन्मूलनम् बालिकायाः अस्तित्वं सुरक्षां च सुनिश्चितं कर्तुं, ताभ्यः उच्चशिक्षां दातुम् अस्याः योजनायाः उद्देश्याः सन्ति। गर्भस्थ-बालिका-शिशूनां हत्या इति कारणात् भारतस्य अनेकेषु राज्येषु स्त्रीणां संख्या पुरुषेभ्यः न्यूनतरा अस्ति। किम् त्वम् जानासि यत् नारी एव स्वस्नेहेन, शिक्षया, संस्कारैः आदर्शैः च सर्वेषाम् जीवनम् सुखदं सज्जितं च करोति।

शिक्षिताः महिलाः अद्य न केवलं संगीत-नृत्य-कलादिषु अपितु सर्वेषु क्षेत्रेषु स्वकौशलं प्रदर्शयन्ति। यदि देशस्य नारी स्वस्थाः, शिक्षिताः प्रगतिशीलाः च सन्ति तर्हि अस्माकं राष्ट्रम् अपि विकसितं भविष्यति। आशासे, त्वमपि जागरूकः भूत्वा अन्येभ्यः अपि प्रेरणा प्रदास्यति। गृहे मातृचरणयोः मम प्रणामाः।

भवतः मित्रम्

वैभवः

# Chapterwise NCERT Solutions for Class 10 Sanskrit (Bhav) :


- Chapter 1-अपठितावबोधनम्
- Chapter 2-पत्रलेखनम्
- Chapter 3-अनुच्छेदलेखमन्
- Chapter 4-चित्रवर्णनम्
- Chapter 5-रचनानुवादः (वाक्यरचनाकौशलम्)
- Chapter 6-सन्धिः
- Chapter 7-समासा:
- chapter 8-प्रत्यया:
- Chapter 9-अव्ययानि
- Chapter 10-समय:
- Chapter 11-वाच्यम्
- Chapter 12-अशुद्धिसंशोधनाChapter 13-मिश्रिताभ्यासः
- Sanskrit : आदर्शप्रश्नपत्रम्

# About NCERT

The National Council of Educational Research and Training is an autonomous organization of the Government of India which was established in 1961 as a literary, scientific, and charitable Society under the Societies Registration Act. The major objectives of NCERT and its constituent units are to: undertake, promote and coordinate research in areas related to school education; prepare and publish model textbooks, supplementary material, newsletters, journals and develop educational kits, multimedia digital materials, etc.Organise pre-service and in-service training of teachers; develop and disseminate innovative educational techniques and practices;collaborate and network with state educational departments, universities, NGOs and other educational institutions; act as a clearing house for ideas and information in matters related to school education; and act as a nodal agency for achieving the goals of Universalisation of Elementary Education.In addition to research, development, training, extension, publication and dissemination activities, NCERT is an implementation agency for bilateral cultural exchange programmes with other countries in the field of school education.Its headquarters are located at Sri Aurobindo Marg in New Delhi. Visit the Official NCERT website to learn more.